International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(5): 126-129
© 2017 IJSR
www.anantaajournal.com
Received: 22-07-2017
Accepted: 23-08-2017

**डॉ. उमेशशुक्ल**
श्रीमती लाड देवी पंचोली आदर्श संस्कृत विद्यालय, बरून्दनी, तह. माण्डलगढ़, जिला–भीलवाड़ा, राजस्थान, भारत

**Correspondence**
**डॉ. उमेशशुक्ल**
श्रीमती लाड देवी पंचोली आदर्श संस्कृत विद्यालय, बरून्दनी, तह. माण्डलगढ़, जिला–भीलवाड़ा, राजस्थान, भारत

# स्फोटतत्त्वावधारणे परस्परं मतभेदानुशीलनम

## डॉ. उमेशशुक्ल

**प्रस्तावना**

अयं च स्फोट : 'आन्तरप्रणवरूपत्वाद् ब्रह्मरूप एव' ओंकार एवं सर्वा वाक् सैषा 'स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति' इति श्रुतेः ।

समाहितात्मनो विद्वन् ब्रह्मणः परमेष्ठिनः ।
हृद्याकाशादभून्नादो वृत्तिरोधाद् विभाव्यते ।।

इति व्यासस्मृतेश्च। स एव प्रणवरूपः स्फोट एकः सन्नपि नानावर्णपदवाक्यरूपध्वनिरूपोपाधि–भेदभिन्नोऽन्तःकरणाद्युपाधिभेदन्ननानात्मकजीवस्वरूपब्रह्मवत्पदवाक्यादिनानात्मको मध्यमाना– दांशरूपरूषितो वैखरीरूपेण परश्रवणगोचरः सन्नन्तःकरणग्राह्यः सर्व्वार्थवाचको भवति। स्फोट्यते व्यज्यते वर्णैर्यः स इति व्युत्पत्त्याऽर्थप्रकाशकत्वमेव स्फोटत्त्वम्, प्रकाशश्च ज्ञानम् । शाब्दिका– नामाशयस्तु परापश्यन्तीमध्यमावैखरीति चतुर्विधा वागस्ति। तासु मूलाधारस्थ–पवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपास्पन्दशून्या बिन्दुरूपिणी परा वागुच्यते। एतद्द्वयं शब्द–ब्रह्मव्यंजकवाग् योगिनां समाधौ निर्विकल्पकसविकल्पकज्ञाविषय इत्युच्यते। समाधिलक्षणन्तु–

समाधिस्तु समाधानं जीवात्मपरमात्मनोः ।
ब्रह्मण्येव स्थितिर्या स समाधिः प्रत्यगात्मनः ।।

एवमेव सूतसंहितायामुपपादितम् –

सोऽहं ब्रह्म न संसारी न मत्तोऽन्यत् कदाचन।
इति विद्यात्स्वमात्मानं स समाधिः प्रकीर्तितः ।।

तस्मादत्र पूर्वमुक्तं स्मार्यते विशेविचाराय परा वागेव संस्कृतपवनसचिवेन नाभिदेशमागत्य पश्यन्तीरूपात्मनाऽभिव्यक्ता सती हृदयपर्यन्तमागच्छता तेन संस्कृतपवनेनाभिव्यज्यमाना तत्तदर्थवाचकस्फोटरूपहिरण्यगर्भदेवत्यापरश्रोत्रग्रहणायोग्यत्वेन जपादौ बुद्धिनिर्ग्राह्या सूक्ष्मा मध्यमा वागुच्यते। तद् आस्यपर्यन्तमागच्छता तेन संस्कृतपवनेनैव कण्ठताल्वादिनेशं प्रापिता मूर्धानमाहत्य परावृत्य च तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्रहणयोग्या विराडधिदैवत्या वैखरी वागुच्यते।
अत एव –

परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ।।
वैखर्या हि कृतो नादः परश्रवणगौचरः ।
मध्यमयश कृतो नादः स्फोटव्यंजक उच्यते[१]।। इति ।

वचनानुसारमेव स्फोटात्मकशब्दस्य ब्रह्मरूपत्वं नित्यत्वंच प्रदर्शितं भवति। तत्र वैखरीनादो ध्वनिः सकलजनश्रोत्रमात्रग्राह्यो भेर्यादिनादवन्निरर्थकः । मध्यमानादस्त्वर्थवाचकस्फोटात्मकशब्द– व्यंजकः सार्थकः। तथा च यथा मुखे मणिकृपाणदर्पणादिव्यंजकोपाधिवशाद् दैर्घ्यवर्तुलत्वादिकमव– भासते तथा घटादिपदध्वनिरूपव्यंग्यतया स्फोटेऽपि घटत्वादिकमवभासते। व्यंजकवर्णपद–वाक्याद्यात्मकध्वनीनामानन्त्यात् स्फोअस्याप्यानन्त्यसिद्धिः।

यथा च जपाकुसुमादिलौहित्य– पीतत्वादि–व्यंजकोपरागवशादेक एव स्वच्छः स्फटिकः, लोहितः स्फटिकः,र पीतः स्फटिक इत्यादि–नानानुभवविषयतामधिगच्छति, नानात्मकच्श्र भवति, तथा प्रकृतेऽपि ध्वनिरूपरूषितत्वेन ज्ञानात्मकता जायते। एवंचोपाधिधर्मेण न वस्त्वानन्त्यंजायेतेति विभाव्य आकाशादिवदेक एव वाक्यस्फोट इति सिद्धान्तः । औपाधिकभेदे त्वस्याष्टविधत्वं प्रतिपाद्यते। यतश्शास्त्रप्रक्रियानिर्वाहाय, लोकानुभवसिद्धव्यवहारादिसिद्धये च तावतां स्फोटनां नितान्तमावश्यकता वरीवर्त्येत। 'औंकार एवं सर्वा वाक्' इति श्रुत्या शब्दस्फोटस्यैवोक्ङांररूपत्वसम्भवात् । प्रणवश्च परापरभेदेन द्विधा। तत्र परो ब्रह्मात्मको अपरश्च शब्दात्मकः उक्तंच सूतसंहितायाम् –

परः परतरं ब्रह्म ज्ञानानन्दादिलक्षणम् ।
प्रकर्षेण नवं यस्मात् परं ब्रह्मस्वभावतः ।।
अपरः प्रणवः साक्षाच्छब्दरूपः सुनिर्मलः।
प्रकर्षेण नवत्वस्य हेतुत्वात्प्रणवः स्मृतः ।।

तदर्थवस्तु सत्यज्ञानानन्दादिरूपब्रह्म यतः प्रकर्षेण नवं निःशेषविकारराहित्येन कूटस्थं तथा प्रवेषेण नवस्तत्प्राप्तिरूपः स्यादिति व्युत्पत्त्या शब्दोऽपि प्रणव इति। अतच्श्र श्रीमद्भागवते द्वादशस्कन्धे कृष्णद्वैपायनो वेदव्यासोऽप्याह यत् समाहितात्मन इत्यादिवचनम्। तथैवेदमपि वचनम् ।

श्रृणोति य इमं स्फोटं सुप्ते श्रोत्रे च शून्यदृक् ।
ये वाग् व्यज्यते यस्य व्यक्तिराकाश आत्मनः ।।

रइत्यनेन प्रणवरूपस्फोटश्रावकत्वेन परमात्मा लक्षितो भवति, जीवस्तु न तथा तस्य करणाधीनज्ञानवत्त्वात् ।

प्रणवस्फोटस्यैव सर्वप्रपंचकारणत्वम् –

स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः ।
स सर्वमन्त्रोपनिषद् वेदबीचं सनातनम् ।।

इत्यनेन समस्तदेवतावाचकत्वं प्रणवस्य समुदीरितम् ।

परस्परमष्टानां स्फोटानामुपन्यासः

वैयाकरणभूषणसारकारेणः भट्टकौण्डेन स्फोटचन्द्रिकादिषु मौनिभट्टकृष्णादिभिरन्यैच्श्र ग्रन्थकारैरष्टौ स्फोटाः स्वीकृताः । तथा हि–'स च स्फोटोऽष्टविधः–वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, वर्णजातिस्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोटः, अखण्डपदस्फोटः, अखण्ड– वाक्यस्फोटच्श्र' इति।
वर्णस्फोटस्य सखण्डाखण्डभेदेन द्वैविध्यं तु न, सुबन्ततिङन्ततदादिभिन्नस्य वाक्यभिन्नस्य च प्रकृतिप्रत्ययसमुदायरूपस्य प्रकृतिरूपस्य प्रत्ययरूपस्य चैकवर्णमात्रावर्णस्फोटघटवर्णशब्देन ग्रहणात्। तदवयवानां चार्थप्रत्यायकतयाऽप्रत्यायकस्यैव खण्डस्य सखण्डपदस्फोटपदेन ग्रहणात् सखण्डवर्णस्फोटानुक्तिरित्याशयः ।
तथा च वर्णपदबोध्यचरमवणोभिव्यक्तस्फोटेन यत्र बोधः, तत्रैव वर्णस्फोटपदव्यवहार्यत्वम्। एवं सबुन्ततिङन्ततदादिघटकान्त्यवर्णाभिव्यक्तस्फोटेनार्थप्रतीतौ पदस्फोट इति व्यवहारः। सुबन्ततिङन्तपदजन्यबोधपूर्वकचरमवर्णाभिव्यक्तस्फोटस्य बोधकत्वे वाक्यस्फोट इति व्यवह्रियते। प्रकृतिप्रत्ययजन्यबोधाभावे सति पदस्फोटेन बोधऽखण्डपदस्फोटः। यथा– 'मणिनूपुरादि', ' वः नः' इत्यादि च। पदजन्यबोधाभावे सति वाक्यस्फोटेन बोधेऽखण्डवाक्यस्फोटः। यथा व्याकरणज्ञान– शून्यानां वाक्यतो बोधे वाक्यम् । वर्णपदवाक्यगतजातिव्यंग्यैरस्फोटैर्बोधः क्रमशो वर्णजातिस्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोट इत्युच्यत इत्युक्तम्[9]।

## स्फोटविचार

नैयायिकनवे परमाणोरिव, वेदान्तिमते ब्रह्मण इव च शाब्दिकसिद्धान्ते स्फोटस्य महती चर्चा विद्यतु तत्र तत्राकरग्रन्थेषु। शब्दिकानां दार्शनिकत्वप्रासादः स्फोटभित्तिमेवावलम्बते। परन्तु स्फोटवादस्य कुतः प्रारम्भो जातः? इत्यस्य समाधाने इतिवृत्तरास्य पृष्ठानि मौनमेवावलम्बन्ते[2]। परन्तु सूक्ष्मेक्षिकया पर्यालोच्यमाने 'वागेव विश्र्वा भुवनानि जज्ञे' 'ओमित्येतदक्षरमिदं सर्वम्' 'वाचो ह वा' इत्यादिश्रुतिरूपाणि स्फोटस्त्रोतांसि वेदब्राह्मणादिवारिधेषु समुपलभ्यन्ते। शब्दिका अमुमेव इत्यादिश्रुतिरूपाणि स्फोटस्त्रोतांसि वेदब्राह्मणादिवारिधेषु समुपलभ्यन्ते। शब्दिका अमुमेव।
रसूत्रात्मकमर्थं सुगमतां सरतांच नयन्ति। वेदब्राह्मणादिषु ग्रन्थेषु शब्दगोवागादिशब्दाः शब्दरूपेऽर्थे प्रयुज्यन्ते, न तु स्फोटशब्दरूपेऽर्थे। अतो वादत्वेन स्फोटवादस्य कदा प्रारम्भ इति प्रश्नोऽद्यापि न समाहितोऽस्ति।
'अवङ् स्फोटायनस्य'[1] इति सूत्रे स्फोटशब्दो दृष्टिगोचरीभवति। अस्य स्फोटायनशब्दस्य हरदत्तः पदमंचर्यां विवरणं करोति– 'स्फोटोऽयनं पारायणं यस्य स स्फोटायनः, स्फोटप्रतिपादनपरो वैयाकरणाचार्यः[2]। नागेशेनापि स्फोटवादे अन्ते स्फोटायनर्षेरेव सिद्धान्तः स्फोटवाद इति प्रतिपादितम्–

'वैयाकरणनागेशः स्फोटायनऋषेर्मतम् ।
परिष्कृत्योक्तवांस्तेन प्रीयतां जगदीश्चरः'[3]।।

यास्काचार्योऽपि प्रारम्भे निरूक्ते शब्दनित्यवं व्यवस्थापयतामाचार्योदुम्बराणानां मतं प्रत्याख्याय शब्दस्य नित्यवं व्यापकत्वमणुत्वंच स्थापितवान् । अत्र दुर्गाचार्यः–'वाप्तिमत्त्वात्तु शब्दस्याणीयस्त्वाच्च' इति स्फोटं प्रतिपादिवान्[4]।
एवं स्फोटस्येतिहासोऽतीव प्राचीनं वर्तते। अमुं स्फोटमुद्दिश्य विभिन्नशास्त्रेषु विभिन्नानि मतानि शास्त्रकाराणामुपलभ्यन्ते।

## स्फोटविषयंक मीमांसकमतम्

मीमांसकाः–'अथ गौरित्यत्र कः शब्दः? गकारोकारविसर्जनीयाः' इति भगवान् उपवर्षः। कण्ठताल्वाद्यभिघातानां श्रवणेन्द्रियविषयाणां वर्णानामेव शब्दत्वं वाचकत्वं चास्ति। प्रकरणपंचिकायां शालिकोऽपि[5] 'कः शब्दोऽभिमतः? वर्णाः, तेषामेव श्रोत्रग्राह्मत्वात्'[6] इति। तथा च भाष्यम् श्रोत्रग्रहणे हि अर्थे लोके शब्दशब्दः प्रसिद्धः'[7] इति। 'अन्यस्मिन् दिनेऽनुभूतेऽद्यानुभूयमानस्य पश्चात्त्राशयिष्यति'[8] इति न्यायात् पराभिताशुविनाशित्वव्यतिरेकसिद्धे तावत्कालस्थिरं चैनं कः पर्यवसानम्। सर्वदेशेषु तदुपलम्भाद् विभुत्वम्। लाघवाच्चैकत्वम्। आनुपूर्वीघटकमव्यवहितोत्तरत्वं चैतत्पक्षे उत्पत्त्यनवच्छिन्नशास्त्रज्ञानाधिकरणकालोत्पत्तिकज्ञानविषयत्वम्। तथा ऽ त्यन्तरागवतः कामिनीसाक्षात्कारस्थले ज्ञानधाराकल्पने गौरवादेकत्वं तद्वद् ज्ञानानामप्येतद्विषये स्थिरत्वम्।
ननु न तावद् वर्णानां प्रत्येकमर्थबोधकत्वमेकस्मादर्थप्रतीतेः। नापि समुदितानां क्षणविनाशिनां समुदायानुपपत्तेः। प्रतिवर्णं च संस्कारकल्पेन गौरवापत्तिः। अतो वर्णोच्चारणनान्तरं यतोऽर्थप्रत्ययो भवति, सोऽयं स्फोटकत्वेन प्रकाशकत्वेन स्फोट इत्युच्यते। स एव पदात्मा शब्दः। एवं वाक्यस्फोटोऽपि। अप्रत्यक्षोऽप्ययमर्थः प्रतीतिलक्षणकायानुपपत्त्या गम्यते। न च वर्णा एवानुभूयन्ते न तदतिरिच्यमानस्वरूपं वस्तुतत्त्वमिति वाच्यम्, पदमेकं वाक्यमेकमिति चैकरूपस्यानुभवात्। न चेयं बुद्धिर्वर्णावगाहिनी, तेषां परस्परभिन्नत्वात्। न चैकत्र नानात्वैकत्वे सम्भवतः विरूद्धत्वात्। एकार्थविषयत्वेनैकत्वमिति चेत्, न, परस्पराश्रयात्। एकपदत्वेनैवेकार्थविषयत्वात्। तस्मान्न वर्णात्मकः शब्दः, किन्तु स्फोटरूप एवेति चेत्, नः, वर्णारिक्तवाचकत्पनायामर्थापत्तिः, प्रमाणम्, प्रत्यक्षं वा? नाद्यः, अर्थप्रतिपत्तेरन्यथाप्युद्यमानत्वात्। नेतरः, तम्दावात्।

न चैकं पदमित्येक– वस्त्ववगाहिनी नानावर्णेष्वनुपपद्यमाना बुद्धिरेव प्रमाणमिति वाच्यम्, वर्णेष्वप्येकार्थविषयत्वेन तदुपपत्तेः। अस्ति खल्वेकामिधेयधीहेतुभावत्रयाणामपि वर्णानामेकस्मरणोपारूढानामश्मनामिवैका पिटरधारणे। नाप्यन्योन्याश्रयः, समधिगतैकाभिधेयधीहेतुभावानां तेषां पश्चात्पदत्वावधारणात्।

कारकविशेषाभिधायी हि पदशब्दः पद्यतेऽनेनेति, स च कार्यसम्बन्धज्ञाने सत्येव भवति नान्यथा। अत एकार्थविषयत्वज्ञाने सत्येव एकपदत्वज्ञानम्। यदाहुः 'अर्थैकत्वादेकं वाक्यम्'[1] इति। पदमप्यर्थैकत्वादेकम्। श्रोत्रग्राह्ये च वस्तुनि शब्दशब्दः प्रसिद्धो वर्ण एव च श्रोत्रग्राह्यो न स्फोटः। अतो नासौ शब्दशब्दवाच्यः कथमर्थप्रत्यायकः स्यात्, शब्दादेवार्थप्रतीतेः सर्वलोकसम्भवात्। आशुतरविनाशिकानां साहित्यासम्भवात् कथं गमकत्वमिति चेत्, संस्कारेणेति। यदाह भाष्यकरः– 'पूर्वपूर्ववर्णजनितसंस्कारसहितोऽन्त्यो वर्णः प्रत्यायकः'[2] इति। व्यापारस्य चाव्यवधाकत्वात् शब्दादर्थं प्रतिपद्यामह इत्युपपद्यते। अथवा भाष्यपर्यालोचनया अन्त्यावर्णस्यैव प्रत्याकत्वम्। एवंच शब्दादिष्वेकवचनमप्युपन्नम्। तथा चोक्तम् –

यदि वा पूर्वसंस्कार इतिकर्तव्यतेष्यते।
वर्णोऽन्त्यो गमकस्तस्य शब्दत्वान्मुख्यता भवेत्[3]।।

केचित्तु–सद्रूपान्यवर्णविषयप्रत्यक्षं पूर्वेषु चातीतेषु वर्णेषु स्मृतिरूपेति चित्रस्वरूपा बुद्धिः सर्वार्थप्रतीतिहेतुरित्याहुः। तथा चोक्तम् –

चित्रारूपां च तां बुद्धिः सदसद्वर्णगोचराम् ।
केचिदाहर्यया वर्णे गुह्यतेऽन्त्यः पदे पदे ।।
अन्त्यवर्णेऽपि विज्ञाते पूर्वसंस्कारकारितम्।
स्मरणं यौगपद्येन सर्वेष्वन्ये प्रचक्षते।।

स्फोटवादिनापि शब्दतत्त्वं कल्पयित्वा पुनः संस्कारकल्पनावश्यं कर्त्तव्या। ध्वनयो हि प्रत्येकं स्फोटाभिव्यंजयन्ति साहित्यंच क्रमवर्तिनां संस्कारद्वारमेवेति तुल्यं तत्कल्पनम्। प्रत्युत स्फोटवादिनः स्फोटसभ्दावो वर्णेभ्यश्च व्यतिरेकः सावयवे पदे गम्यमाने निरवयवत्वमित्यधिका कल्पना स्यात्। तस्माद् वर्णा एव वाचकाः, न तदातिरिक्तः स्फोटो युक्तिसिद्ध इत्याहुः।

गुरूमतानुयायिनस्तु–'वर्णेष्वेव प्रत्येष्वर्थप्रतीत्युपपत्तये कश्चिश्द् विशेष आश्रयितुं युक्तं सर्वपूर्वपूर्वोपलम्भसापेक्षत्वादन्त्यवर्णस्य। उपलम्भस्य च क्षणिकतया स्वतो विशेषयितुमशक्यत्वात् पूर्वपूर्ववर्णोपलम्भजन्यः संस्कार एवाश्रीयते। स च स्मृतिहेतोः संस्काराद् भिन्न एव। स्मृतिहेतुहिं संस्कारो यदुपलम्भप्रभावितस्तत्रैवोपलम्भान्तरं जनयितुमलम्, नार्थान्तरमित्यर्थविषया प्रतीति– स्ततोऽनुपपन्नेति तदतिरेकिणः संस्कारस्याश्रयणम्'। येन क्रमेण विषया अनुभूतास्तेनैव क्रमेण स्मर्यन्त इति तु प्रमाणविरहितम्, एकैकशो दृष्टेष्वपि घटेषु 'सहस्त्रं घटाः' इति समुदितस्य स्मरणात्। तदित्थं वर्णा एवं शब्दः। ते च व्यापका नित्याश्च। सर्वोऽपि ककार एक एव। पदवाक्यानामपि वर्णसमुदायरूपत्वं प्रत्येकमेकत्वं नित्यत्वं विभुत्वंच। पदादीनामनित्यत्वे 'औत्पत्तिकस्तु' शब्दस्यार्थेन सम्बन्ध' इति तत्सम्बन्धनित्यत्वप्रतिपादकं व्याकुप्येत। तथा चोक्तम्–

'तस्मान्न पदधर्मोऽस्ति विनाशी कश्चिश्दीदृशः।
तेन नित्यं पदं सिद्धवर्णनित्यत्ववादिनाम् ।। इति।

शब्दो द्रव्यं साक्षदिन्द्रियसम्बन्धवेद्यत्वात्, घटवदित्यनुमानेन चैषां वर्णानां द्रव्यत्वम्। शब्दो ध्वन्यात्मको वर्णात्मकश्च। वर्णव्यंजको ध्वनिर्वायुगुणः। वर्णस्तु द्रव्यं ध्वनिव्यङ्ग्यमित्याहुः।

पातंजयोगास्तुः पदस्फोटस्य वाक्यस्फोटस्य च वाकत्वं स्वीकुर्वन्तो वर्णानां वाचकत्वं प्रत्याचक्षते।

अयमभिसन्धिः– तेषामर्थप्रत्ययो हि वर्णैर्नियतक्रमतया परस्परसम्भवभ्दिरशक्यः कर्त्तुम्। न च संस्कारद्वाराऽऽग्नेयादीनामिव परमापूर्वे वा स्वर्गे जनयितव्ये नियतक्रमाणामपि साहित्यमर्थबुद्धये प्रजनने वर्णानामिति साम्प्रतम्, विकल्पासहत्वात्। स खल्वयं वर्णानुभवजन्यः संस्कारः स्मृतिप्रसवहेतुरन्यो वाऽऽग्नेयादिजन्य इवापूर्वाभिधानो, न तावदनन्तरः, कल्पनागौरवापत्तेः। स एव तावददृष्टपूर्वः कल्पनीयस्तस्य कल्पनेऽतिगौरवम्। न चैष ज्ञापकहेत्वंऽतामनुभवतीति। न खलु सम्बन्धोऽर्थप्रत्यायनांऽतातुपैति। स्मृतिफलप्रसवानुमितिस्तु संस्कारः स्वकारणानुभवविषयनियतो न विषयान्तरे प्रत्ययमाधातुमुत्सहते, अन्यथा यत् किंचिदेवैकैकमनुभूय सर्वः सर्वं जानीयादिति। न च प्रत्येकवर्णानुभवजनितसंस्कारपिण्डलब्धजन्मस्मृतिदर्पणसमारोहिणो वर्णाः समधिगतसहभावा वाचका इति साम्प्रतम्, क्रमाक्रमविपरीतक्रमानुभूतानां तत्र विशेषणार्थधीजननप्रसंगात्। न चैतत्स्मरणज्ञानं पूर्वानुभववर्तिनीं परापरतां गोचरयितुमर्हति। तस्माद् वर्णोऽसम्भवन्नर्थप्रत्यय एकपदानुभवमेव स्वनिमित्तमुपकल्पयति, न चैष प्रसंग, तद्धि प्रत्येकमेव प्रयत्नभेदभिन्ना ध्वनयो व्यंजयन्तः परस्परविसदृशतत्तत्पदव्यंजकध्वनिभिस्तुल्यसमानकरणनिष्पन्नाः सदृशाः सन्तोऽन्योऽन्यविसदृशैः पदैः पदमेकं सदृशमापादयन्तः प्रतियोगिभेदेन तत्तत्सादृश्यानां भेदात् तदुपधानादेकमप्यवयवमपि सावयवमिवानेकात्मकमिवावभासयन्ति। यथा नित्यवर्णपरिमाणसंस्थानं मुखमैकमपि मणिकृपाणं दर्पणादयो विभिन्नवर्णपरिमाणं संस्थानमनेकमादर्शयन्ति न परमार्थातः। सादृश्योपधानभेदकल्पिता भाग एव निर्भागस्य पदस्य वर्णाः, तेन तद्वृद्धिर्वर्णात्मनां स्फोटमभेदमेव निगमेन सभेदमिव सभागमिवालम्बते। अतो गोपदस्फोटभेदस्यैकस्य 'गौः' इत्यादिपदस्फोटसादृश्येन न निर्धारयति स्वीयमित्याकारेण विशष्टो निर्धारयति, एवमौकारोऽपि भागः विशिष्टो निर्धारयति। असहभाविनामपि च संस्कारद्वारेणास्ति सहभाव इति विशेषविशेष्यैवोपपत्तिरिति।

**स्फोटविषयंक वेदान्तिमतम्**

वर्णानामेव वाचकत्वं स्वीकुर्वन्ति, तेषां मते स्फोटाभावत् । इदं तेषामभिप्रेतं यदि वर्णानां वाचकत्वं न सम्भवेत्, स्फोटश्चानुभवपद्धतिमध्यासीत्, तदैव वर्णातिरिक्तः स्फोटोऽभ्युपेयेत। वर्णानामवाचकत्वं क्षणिकत्वेनाशक्संगतिक्रमत्वाद् व्यस्तसमस्तप्रकारद्वयभावाद् वा वर्णानां क्षणिकत्वे प्रथमः कल्पस्तावन्निरस्तः। ननु वर्णानां प्रत्युच्चारणमन्यत्वं सर्वजनप्रसिद्धमिति चेत्, न, प्रत्यभिज्ञायमानत्वात्। न चासत्यप्येकत्वे ज्वालादिवत् सादृश्यनिबन्धनमेतत्प्रत्यभिज्ञानमिति साम्प्रतम्, सादृश्यनिबन्धत्वमस्य बलवद्बाधकोपनिपाताद् वा स्थीयते, क्वचिज्ज्वालादौ व्यभिचारदर्शनाद् वा। न चेदं प्रत्यभिज्ञानं गवादिजातिविषयं न गवादिव्यक्तिविषयम् तासां प्रतिनरं गोपदोपलम्भात्। अत एवं शब्दभेदोपलम्भाद् व्यक्तिभेद उन्नीयते, सोमशर्माधीते न विष्णुशर्मेति युक्तम्। यतो बहुषु गकारमुच्चारयत्सु निपुणमनुभवः परीक्ष्यताम्। यथा कालाक्षीं च स्वस्तिमतीं चैक्षमाणस्य व्यक्तिभेदप्रथायां सत्यामेव तदनुगतमेकं सामान्यं प्रथते, तथा किं गकारादिषु भेदेन प्रथमानेष्वेव गत्वमेकं तदनुगतं चकास्ति, किं वा यथा गोत्वमजानत एकं भिन्नदेशपरिणाम– संस्थानव्यक्त्युपधानभेदाद् भिन्नदेशमिवाल्पमिव महदिव दीर्घमिव वामनमिव तथा गोव्यक्तिरजानत एकापि व्यंजकभेदात्तद्धर्मानुपातिरिव प्रथत इति भवन्त एवं विदांकुर्वन्तु।

तत्र गोव्यक्तिमंङीकृत्यापि यो गोत्वस्यैकस्य परोपधानभेदकल्पनाप्रयासः, स वरं गोव्यक्तावेवास्तु किमन्तर्गड्ुना गत्वेनाभ्युपेतेन। सत्यपि समस्तवर्णप्रत्यवमर्शे यथा क्रमानुरोधिन्यः पिपीलिकाः पङ्क्तिबुद्धिमारोहन्ति, एवं क्रमानुरोधिन एव वर्णाः पदबुद्धिमारोपयन्ति। अतो जारा राजा कपिः पिक इत्यादौ पदविशेषप्रतिपत्तौ नास्ति काचनापि विप्रतिपत्तिः। वृद्धव्यवहारे चेमे वर्णाः क्रमाद्यनुगृहीता गृहीतार्थविशेषसम्बन्धाः सन्तः स्वयवहारेऽप्येकैकवर्णग्रहणानन्तरं समस्त–प्रत्यवमर्शिन्यां बुद्धौ तादृशा एव प्रत्यवभासमानास्तं तमर्थमव्यभिजारेण प्रत्यायिष्यन्तीति वर्णवादिनो लघीयसी कल्पना।

स्फोटवादिनस्तु, दृष्टहानिरदृष्टकल्पना च कर्त्तव्या भवति। वर्णाश्च्रेमे क्रमेण गृह्यमाणाः स्फोटं व्यंजयन्ति, स स्फोटोऽर्थं व्यनक्तीति गरीयसी कल्पना स्यात्। अतो वर्णा एव वाचका नित्या विभवश्च्रेति।

अत्रेदं विचारणीयम् – स्वसिद्धान्तभंगभिया वर्णानां नित्यवं सापेक्षमेव स्वीकार्यमिति वस्तुतो वर्णानामनित्यत्वमेव सृष्टिप्रलयमध्ये विनाशित्वाभावरूपमेव तत्। एवंच सृष्टीनामानन्त्येनानन्त–वर्णतद्ध्वंसप्राग्भावादिकल्पनाया गले पतितत्वाल्लाघवं शशशृंगयमाणमेव। किंच गकारादिषु गत्वादिजातेरभावेन गकारादिज्ञानस्य निर्विकल्पकात्मकत्वेन प्रत्यक्षत्वानापत्तिः। ध्वनिगतगवादि– भानस्वीकारे तु तदभाववति तत्प्रकारकज्ञानत्वेन भ्रमत्वापत्तिर्दुर्वारा। किंच गत्वादिजातिमस्वीकमृत्य वर्णैकत्वरूपमूलधनमप्यपहारितम्।

तस्माद् ध्वनिभेदा एव वर्णाः, न तु ध्वन्यतिरिक्ता नित्याः। क्वचिद् भाष्ये 'वर्णा नित्याः' इत्युक्तिस्तु स्फोटपरा। वर्णानामनित्यत्वे च तत्र वाचकत्वस्य तु दुरूपपादतया तदतिरिक्तस्फोटकल्पना वेदान्तिनोऽपि स्वीकार्या। वैयाकरणनये तु स्फोटस्य ब्रह्मरूपतया तत्रैव ध्वनिगतधर्माणामध्यस्तत्वाद् ब्रह्मणि प्रपंचाध्यासे भिन्नभिन्नरूपेण तत्प्रतीतिरिव वर्णभेदप्रतीतिर्नानुपपन्ना। न च तव मतेऽपि स्फोटस्य ब्रह्मत्वेन निर्धर्मिकतया तत्र गत्वादिप्रकारकप्रतीतेर्भ्रमत्वं दुर्वारमेवेति वाच्यम्, तुरीयदशायां भ्रमत्वेऽपि तव ब्रह्मण एव प्रपंचरूपेण प्रतीतिवद् व्यावहारिकदशायां बाधत्वेन भ्रमत्वस्य वक्तुमशक्यत्वाद् एवंच मीमांसकादीनां स्फोटवादखण्डनं शाब्दिकनयानवगमावजृम्भ्रणमात्रम्।

### स्फोटविषयंक सांख्यमतम्

प्रत्येकवर्णेभ्योऽतिरिक्तं कलश इत्यादिरूपमखण्डमेकं पदं स्फोट इति योगैरभ्युपगम्यते, कम्बुग्रीवाद्यवयवीयोऽतिरिक्तो घटाद्यवयवीव। स च शब्दविशेषः पदाख्योऽर्थस्फुटीकरणात् स्फोट इत्युच्यते। स शब्दोऽप्रामाणिकः, कुतः? प्रतीत्यप्रतीतिभ्याम्। स स्फोटाख्यः शब्दः किं प्रतीयते, न वा? आद्ये, येन वर्णसमुदायेनानुपूर्वीविशेष्टेन सोऽभिव्यज्यते। तस्यैवार्थप्रत्याकत्वमस्तु, किमन्तर्गडुना तेन? अन्त्ये त्वज्ञातस्य स्फोटस्य नार्थप्रत्यायनशक्तिरिति व्यर्था स्फोटकल्पना। 'स एवायं गकारः' इति प्रत्यभिज्ञाबलाद् वर्णनित्यत्वं न युक्तम्, 'उत्पन्नो गकारः' इत्यादिप्रत्येना–नित्यत्वसिद्धेः। प्रत्यभिज्ञा च तज्जातीयताविषयिणी। अन्यथा घटादेरपि प्रत्यभिज्ञया नित्यतापत्तिरित्याहुः।

### स्फोटिविषयकं नैयायिकमतम्

पदानामेव वाचकत्वम्। वर्णानां समूहः पदम्, पदानां समूहो वाक्यम्। वर्णाश्चानित्याः। ननु वर्णानामनित्यत्वे सोऽयं ककारमिति प्रत्यभिज्ञाया उपपत्तिर्न स्यादिति चेत्, न, सोऽयं धान्यराशिरितिवज्जातिनिबन्धना, साध्यनिबन्धना वा प्रत्यभिज्ञेति वक्तुं शक्यत्वेनादोषात्। ननु तथापि क्रमोत्पन्नविनष्टानां वर्णानां सहभावित्वात् तत्समूहस्य पदस्य पदसमूहस्य वाक्यस्य च विलयापत्तिरिति चेत्, न, संस्कारद्वारा तदुपपादयितुं शक्यत्वात्। यथा क्रमोत्पन्ना अपि प्रत्येकग्रासाः समुदितास्तृप्तिमुत्पादियन्ति, तथा क्रमवर्तिनोऽपि वर्णाः समुदिता एवार्थाभिधायिनो भवन्ति। न तावदनुमानमहिम्ना स्फोटस्वरूपमुपपादयितुं पार्यतु, परिदृश्यमानविशिष्टानुपूर्वीकवर्णकलाप – करणेनार्थप्रतीतेर्घटमानत्वात्। नापि प्रत्यक्षतः, वर्णानामेव प्रत्यक्षत्वादित्याहूः। अधिकं जयन्तभट्ट– कृतायां न्यायमंचर्यां द्रष्टव्यम्।

### वैयाकरणमतम् –

स्फोट एवं वाचको न तु वर्णाः स्फोटानुभवानन्तरं विदितसंगतेरार्थधीसमुत्पादत्। न च वर्णातिरिक्तस्य तस्यानुभवो नास्ति, गौरित्येकं पदम्, गामानय शुक्लामित्येकं वाक्यमिति नानावर्णपदातिरिक्तैकपदवाक्यावगतेः सार्वजनीनत्वात्। न चायमसति बाधके एकपदवाक्यानुभवः शक्यो मिथ्येति वक्तुम्। नाप्यौपाधिकः, उपाधिः खल्वेकधीग्राह्यता या स्यात्, एकार्थधीहेतुता वा? न तावदेकधीगोचराणां धवखदिरपलाशानामेकनिर्भासः प्रत्ययः समस्ति। तथा सति धवखदिरपलाशा इति न जातु स्यात्। नाप्येकार्थधीहेतुता, तद्धेतुत्वस्य वर्णेषु व्यासेधात्। तद्धेतुत्वेन तु साहित्य–कल्पनेऽन्योन्याश्रयप्रसंगः, साहित्यात् तद्धेतुत्वम्, तद्धेतुत्वाच्च साहित्यमिति। तस्मादय– मबाधितोऽनुपाधिश्च्र पदवाक्यगोचर एकनिर्भासो वर्णातिरिक्तं वाचकमेकमवलम्बते स स्फोट इति। तच्च ध्वनयः प्रत्येकं व्यंजयन्तोऽपि न द्रागितयेव विशदयन्ति, येन द्रागर्थधीः स्यात्। अपि तु रत्नतत्त्वज्ञानवद् यथास्वं द्विचतुष्पंचषड्दर्शनजनितसंस्कारपरिपाकसचिवतेतोलब्धजन्मनि चरमें चेतसि चकास्ति विशदं पदवाक्यतत्त्वमिति प्रागुत्पन्नायास्तदनन्तरमर्थधिय उदय इति नोत्तरेषामानर्थक्यं ध्वनिनापि प्राचाम्, तदभावे तज्जनितसंस्कारत्परिपाकत्वेनानुग्रहाभावात्। अन्त्यस्य चेतसः, केवलस्याजनकत्वात्। न च पदप्रत्ययवत् प्रत्येकमव्यक्तामर्थधियमाधारस्यन्ति प्रांचः, चरमस्तु तत्सचिवः स्फुटतरमिति युक्तम्, व्याक्तव्यक्तावीन्सितायाः प्रत्यक्षज्ञाननियमात्, स्फोटज्ञानस्य च प्रत्यक्षत्वाद् अर्थधियस्तत्र प्रत्यक्षाया मानान्तरजन्मनो व्यक्त एवोपजनो न वा स्यात् पुनरस्फटमिति समः समाधिः तस्यान्नित्यः स्फोट एव वाचकः, न वर्णाः। अस्य च स्फोटस्योपाधिभेदादष्टौ भेदा वर्णपदवाक्यरूपरूषितस्य भानाद् वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटच्श्रेति त्रयः। अत्रैव जातिव्यक्तिभेदेन वर्णजातिस्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोट इति त्रयः। पदवाक्ययोः सखण्डाखण्डत्वभेदात् सखण्डपदस्फोटः, सखण्डवाक्यस्फोटच्श्रेति द्वौ। एवं संकलनयाऽष्टौ स्फोटा इति नागेशादयः।

व्याकरणदर्शनभूमिकायां षोडश स्फोटानाहुः। तथा हि–अस्यां स्थितौ वाक्यार्थज्ञानामस्माकं कृते वाक्यस्फोटस्य विलय एवं स्यात्। नापि 'पचति' इत्यादौ पदस्फोटव्यवहारः। तथा चायं विभागो नहि युक्तियुक्तः। अत एव नागेशभट्टो नहि अष्टौ स्फोटान् मंजूषायां निरदिक्षत्। किन्तु केवलमान्तरबाह्यभेदेन द्वौ स्फोटौ प्रदर्श्य बाह्यस्फोटस्य जातिव्यक्तभेदेन द्वावेव भेदौ प्रादर्शयत्। तथा च व्यवहारदृष्ट्या बाह्यस्फोटप्रदर्शने प्राप्तवक्ष्यमाणरीतिरेवास्माभिरवलम्बनीया। तथा हि–'व्यक्तिः पदार्थः' इति व्याडिमते व्यक्तिस्फोटः। जातिपदार्थवादिनो वाजप्यायनस्य मते जातिस्फोटः, इत्येवं रूपेण द्वौ स्फोटावभ्युपगन्तव्यौ। यदि चावान्तरस्फोटप्रतिपादने आग्रहस्तर्हि कल्पितानि पदानि कल्पितपदेषु कल्पितौ प्रकृतिप्रत्ययावादाय वक्ष्यमाणपद्धत्या स्फोटः स्वीकार्यः। एवं सति (1) प्रकृतिस्फोटः, (2) प्रत्ययस्फोटः, (3) प्रकृतिजातिस्फोटः, (4) प्रत्ययजातिस्फोटः, (5) पदस्फोटः, (6) पदजातिस्फोटः, (7) वाक्यस्फोटः, (8) वाक्यजातिस्फोटः, (9) अखण्डपदजातिस्फोटः, (10) अखण्डवाक्यस्फोटः, (11) अखण्डवाक्यजातिस्फोट इति द्वादश स्फोटा भविष्यन्ति। तत्तदवयवविवक्षाऽविवक्षाभेदेन प्रकृतिप्रत्यादिकल्पनाभ्यां सर्वेषां कृते एते द्वादश स्फोटा प्रत्यपादयत्।

यच्च भट्टनागेशो लघुमंजूषायाम्[1] –तत्र प्रकृतिप्रत्ययनिपातानामेकवर्णानामर्थवत्त्वदर्शना– दित्यादिना प्रत्याहराह्निके भाष्ये उक्तः प्रकृतिप्रत्यययोर्वाचकत्वमित्येवं रूपा वर्णस्फोटः शास्त्रीयप्रक्रियोपयोग्येव न वास्तवः' इत्याद्यवोचत्, तद् वक्ष्यमाणभाष्यविरोधाद्धेयमेव।

वस्तुतस्तु वर्णस्फोटोऽप्यधिकस्तत्र निवेशयितुं शक्यते, प्रत्याहाराह्निके –'ऐऔच्' सूत्रोपरि 'अथवोभयतः स्फोटमात्रं निर्दिश्यते'[2] इति भाष्योक्त्या शुद्धेषु ऋकारादिवर्णेषु स्फोटसत्ताया अभ्युपगमात्। तथा च जातिव्यक्तिभेदेन द्वौ वर्णस्फोटावधिकौ तत्र सन्निवेश्याविति चतुर्दशस्फोटाः सम्पन्नाः। प्रकृतिप्रत्ययविषयेऽपि अखण्डसखण्डभेदेन द्वयोरपरयोरपि सम्मेलने षोडश स्फोटाः सम्पद्यन्ते। एते सर्वेऽपि अखण्डसखण्डभेदेन द्वयोरपरयोरपि सम्मेलने षोडश स्फोटाः सम्पद्यन्ते। एते सर्वेऽपि स्फोटा विहाय पदवाक्यकल्पनायाः खपुष्पायमाणत्वाद् इत्यलम्।